वीरशैवलिंगिब्राह्मणधर्मग्रंथमाला
ग्रंथ १4 वा
(रामेश्वरपंडितकृत)
हरिहरतारतम्यम्
वेदमूर्ति मणूरमठाध्यक्ष
मल्लिकार्जुन शास्त्री
शके 1826 - सन् 1904

शुद्धिपत्रिका

| पृ० | प० | अशुद्ध | शुद्ध |
|---|---|---|---|
| १ | २० | विष्णू | विष्णु |
| ५ | १९ | साखे | सारखे |
| ६ | १५ | करून | करून खरें |
| ६ | १६ | त्याला | त्यालाच |
| ६ | २२ | करून | करून खरें |
| १५ | ११ | दुसऱ्या | दुसऱ्याची |
| २२ | १३ | महादेव | महादेव |
| २३ | २२ | काळे | काळें |

पृ० १) ॥ श्रीः॥
॥ श्रीसदाशिवमूर्तये नमः ॥
हरिहरतारतम्यप्रारंभः

वृद्धान् श्रुतिस्मृतिपुराणविशेषभाषान् निःशंकबुद्धिकुशलान् प्रणिपत्य नित्यम् ॥
अद्वैतमेकमभजं श्रितभेदबुद्धिः पृच्छाम्यंहं हरिहरस्थिततारतम्यम् ॥ १॥

एक: समुद्रसलिले वटपत्रशायी त्वन्यः समुद्रशरधिस्त्रिपुरप्रभेदे ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ २॥

पृ० २ नहीं है।

पृ० ३) स्थितकंदरेषु ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ६॥

एकः सहस्त्रकमलैर्यमुपार्च्य तस्थावन्यस्तु तैरुपचितः सह मोदते स्म ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ७ ॥

गाढांधकारघननीलशरीर एको ज्योत्स्नातिनिर्मलविशुद्धशरीर अन्यः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ८ ॥

एक: कुमारमभजत्सुतरामनंगमन्यः प्रयाति किल शक्तिधरं कुमारम् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ९॥

पृ० ४) स्त्रीरूपमाप किल पूर्वमभीष्टमेकस्त्वन्यस्तमेवमभजत्पुरुषस्य रत्या ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ १०॥

मुष्णाति वल्लवगृहे नवनीतमेकस्त्वन्यो ददाति सुधियां परमामृतं तत् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ११॥

एकः प्रयाति हि सकाम इति प्रसिद्धिमन्यो तथा निहतकाम इति प्रसिद्धिम् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयाः ॥ १२॥

पृ० ५) एकस्य जात इति संततलोकवार्ता नान्यस्य तादृशविदूषितदोषवार्ता ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ १३ ॥

एकस्य वार्धुषिकजीवनवृत्तिरासीदन्यस्य चापि बहुभाग्यदवृत्तिरासीत् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ १४ ॥

एकस्तु वाणगतिमेत्य क्वरवणोऽद्य? त्वन्योऽक्षिपत्युरजयाय? तमेव वाणम ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः संत्य वदंतु तमिमं वयमाश्रयामः ॥ १५॥

पृ0 ६) एको विभाति रविचंद्रमयद्विनेत्रस्त्वन्यो रवींदुशिखिरूपघनत्रिनेत्रः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ १६॥

एकः सदा सवितृमंडलमध्यवर्ती चान्यः सदा सवितृदंतभिदापटीयः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः॥ १७॥

एकस्तु दीनमजरक्षणदत्तबुद्धिस्त्वन्यस्तु मत्तगजशिक्षणदत्तबुद्धिः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ १८ ॥

पृ0 ७) गोपालकत्वमधिगम्य विभाति चैकस्त्वन्यो वृषाधिपतिनायक इत्यगादि ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ १९ ॥

ब्रह्माणमाप निजनाभिसरोज एकोऽन्यो ब्रह्मणो नखमुखेन शिरश्चकर्त ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ २०॥

विश्वैकदेशवसतिर्मुदमेति चैको विश्वेश्वरोऽयमिति याति हि कीर्तिमन्यः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ २१ ॥

पृ0 ८) एकोऽस्ति केशव इति प्रथितस्तु लोकेऽन्यो व्योमकेश इति याति जगत्प्रसिद्धिम् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ २२॥

एकः समक्ष्युदहरन्निजमब्जपूर्त्यै त्वन्यस्तदा नयनमस्य ददौ च चक्रम् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ २३ ॥

एको ह्यगाधलुब्दब्धिवजले? निममः? कैलासशैलशिखरे खलु वर्ततेऽन्यः ।
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ २४ ॥

पृ0 ९) एकः सुरैरुपगिरं हि तपश्चकार तस्मै ददौ सुतमधिक्षिति सांबमन्यः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ २५ ॥

एकस्तु नैल्यमुपयाति शरीरमात्रे त्वन्यस्तु नैल्यमुपयच्छति कंठमात्रे ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ २६॥

एकः प्रसिद्धिमिह धेनुवधं विधाय व्याघ्रं निहत्य नितरामितरः प्रसिद्धः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ २७॥

पृ0 १०) एकः सदाष्टमहिषीरुपयाति शीघ्रमन्यो बिभर्ति नितरामपि चाष्टमूर्तिम् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ २८ ॥

एकः सुवर्णवसनं विदधाति कट्यामन्यः सुवर्णगिरिचापमधात्कराग्रे ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ २९॥

एको दवौ शिरसि बर्हिणपिच्छमात्रमन्यो मयूरवरवाहनपुत्रदृष्टिः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ३०॥

पृ0 ११) एको दधाति हृदि कौस्तुभरत्नमेकमन्यः सहस्रफणिरत्नमहींद्रहारम् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ३१॥

इंद्रानुजत्वत उपेंद्र इतीड्य एक इंद्रादिभिः सुरगणैः परिपूज्यतेऽन्यः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ३२॥

लक्ष्मीं वहन्नपि च वांछति वित्तमेको भिक्षामटन्नपि च यच्छति भाग्यमन्यः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ३३॥

पृ0 १२) एकः करेण धृतवानिह पांचजन्यमन्यस्तथैव बहुविश्वसृजः कपालम् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ३४॥

एकस्तु माधव इति प्रथितः स्वनाम्ना त्वन्यो ह्युमाधव इति प्रथितः स्वनाम्ना ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ३५॥

वृंदावने चरति गोभिरुपेत्य चैको त्वन्यो भृशं पितृवनेचरतीह भूतैः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः॥ ३६॥

पृ0 १३) एक: कदापि मधुमात्रहृतिं चकार त्वन्यो महाविषहृतिं च तथा चकार ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ३७॥

एकस्तु कैटभवधे निपुणस्तथैवमन्यस्तु मृत्युहनने निपुणो नितांतम् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ३८॥

एको व्रजेषु कुरुते मृदुवेणुनादमन्यो लयेषु कुरुते विकटाट्टहासम् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः॥ ३९॥

पृ0 १४) पक्षींद्रवाहन इति प्रथितोऽयमेकस्त्वन्यो य?होक्षवरवाहन इत्यभाणि ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ४०॥

एकस्तु योनिज इति ह्यगमत्प्रसिद्धिमन्यस्त्वजात इति याति जगत्प्रसिद्धिम् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ४१॥

एकस्त्वनित्य इति सुप्रथितो जगत्यामन्यस्तु नित्य इति शंसति लोकसिद्धिः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ४२॥

एको श्रुलूखलनिबद्ध इति प्रसिद्धस्त्वन्यो विमुक्तभवपाश इति प्रसिद्धः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः॥ ४३ ॥

पृ0 १५) एकस्तु पार्थरथवाजिकृतोपचारस्त्वन्यस्तु पार्थसमरप्रणुतप्रभावः॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ४४॥

एको जनार्दन इति प्रकटीकृतोऽयमन्यस्तु शंकर इति स्फुटमीड्यते स्म ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ४५॥

भक्तं बलिं पुनरधःकृतवानिहैको भक्तं कुबेरमधिकश्रियमाधृतोऽन्यः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ४६॥

पृ0 १६) व्याधादिनीचहृतनैजवधूक एको व्याधायितोऽपि निगमैरभिराश्रितोऽन्यः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ४७॥

एकस्य सेवकजना भृशदग्धगात्रा ह्यन्यस्य सेवकजनाः सविभूतिरेखाः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ४८॥

पृ0 १७) एको दधौ सितपुंड्रं तिलकं ललाटे त्वन्यो दधौ हुतवहं तिलकं ललाटे ।
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ४९॥

एको दधाति तुलसीकृतमालिकां हृद्यन्यो दधाविति विधातृकपालमालाम् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ५०॥

गोपालकैरनुसृतः सुतरामिहैको दिक्पालकैरनुसृतस्तु दिगंबरोऽन्यः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ५१ ॥

एको मिलत्यनु * *? * * * * * * * * * * * * * * * * * * * * * ॥
वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ५२॥

पृ0 १८) एको मृगाभिलषितो गहने चचार ह्यन्यो मृगं करतलेन वहंश्चचार ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ५३॥

एको दशास्यहृतनैजवधूक आसीदन्यो वधूविलसितार्धशरीर आसीत् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ५४॥

पृ0 १९) एकस्तु शैलनिचयैः शरधिं ववंध ह्यन्यस्तमेव शरधिं त्रिपुरे चकार ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ५५ ॥

एकस्तु मर्कटभटेन ददाह लंकां ह्यन्यः करेण च ददाह पुरत्रयं तत् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ५६॥

एकस्तु मर्कटभटैर्निजकार्यकारी ह्यन्यः सुरेद्रनिवहैर्निजकार्यकारी ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ५७॥

एको विवेश? सरयूसलिलांतराले त्वन्यो दधौ त्रिपथगां कणवज्जटायाम्॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ५८॥

पृ0 २०) एकः शिवं जगति पूजयति स्म सेतौ रामेश्वरोऽद्य तु जनैः परिदृश्यतेऽन्यः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः॥ ५९ ॥

एकस्तु मत्स्यतनुमेत्य गतोऽब्धितोये ह्यन्यस्तु मत्स्यकलितध्वजधक् प्रसिद्धः॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ६०॥

पृ0 २१) एको नृसिंहतनुमेत्य जघान दैत्यमन्यस्तमेव हतवान् शरभावतारे ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ६१॥

एको बटुः कपट इत्यखिलैरभाणि विद्यागुरुस्त्वपर इत्यखिलैरभाणि ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ६२॥

एकोऽपि चौर्यहतवानिह ताटकां स्त्रीमन्यो जघान हि मदांधकराक्षसेंद्रम् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ६३॥

* * * * * * * * * * * * * *? येऽपि हि चास्ति शक्तिः ॥
पृ0 २२) को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयामाश्रयामः ॥ ६४॥

एकः प्रसिद्ध इह संप्रति वासुदेवो देवो महानिति सदा च ततः प्रसिद्धः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः॥ ६५ ॥

एकः पदेन शकटं सहसा नुनोद ह्यन्यः पदांगुलिनखेन गिरिं नुनोद ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ६६ ॥

एकः पदत्रयमितं त्रिजगच्चकार ह्यन्यः पदाहतिहतं त्रिजगच्चकार ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ६७॥

पृ0 २३) एकस्य रूपमधिगच्छति तामसत्वमन्यस्य रूपमधिगच्छति सात्विकत्वम् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ६८॥

नीलोऽपि नीलयमुनाजलमग्न एकः शुभ्रोऽपि शुभ्रतरदिव्यधुनीधरोऽन्यः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ६९॥

एकस्य सूनुरपि नेत्रकृशानुदग्धो ह्यन्यस्य वत्स उदितः खलु शाश्वतायुः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ७०॥

एको वराहतनुमेत्य भुवं विलेख ह्यन्यो भुवं पुरजये स्वरथीचकार ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ७१॥

एको चलां निजवधूं न शशाक रोद्धमन्यश्चकार वनितां स्फुटमर्धमात्रे ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ७२॥

एको विभाति नितरां शिखिपिच्छचूडस्त्वन्यो विभाति नितरां नवचंद्रमौलिः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः॥ ७३ ॥

एकस्य सूकरजनिः सुलभास्ति हीना ह्यन्यस्य चेच्छरभरूपमतिप्रसिद्धम् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ७४ ॥

एको विभाति भृशमेकमुखांबुजेन ह्यन्यो विभाति भुविपंचमुखैः प्रसिद्धैः॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः॥ ७५॥

पृ0 २६) एकश्चतुर्भुज इति प्रथितस्त्रिलोक्यामन्यो भृशं दशभुजैः प्रथितो जगत्याम् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ७६॥

पंचायुधप्रबलशक्तिमुपैति चैकः सर्वायुधप्रबलशक्तिमुपैति चान्यः॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः॥ ७७ ॥

एको मुमूर्च्छ गहने च किरातवाणादन्यो ह्यमूर्च्छय दुरुत्रिपुरस्थदैत्यान् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः॥ ७८॥

एकस्तु चक्रमधिगम्य ररक्ष लोकांश्चक्रप्रदः पुररिपुः सुरचक्रवर्ती ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ७९॥

एकस्त्रिपादिति भृशं जगति प्रसिद्धो ह्यन्यस्य सेवकजनोऽपि तदा प्रसिद्धः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ८०॥

एकस्तु साधु हयवक्त्र इति प्रसिद्धो ह्यन्यस्य पुत्र इभवक्त्र इति प्रसिद्धः॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ८१॥

पृ0 २८) एकस्य भाति चतुरानन एव सूनुरन्यस्य भाति हि षडानन एव सूनुः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः॥ ८२ ॥

आदाय वेदमदिशद्विधये पुरैकोऽन्यो वेदवाजिषु विधिं विदधे स सूतम् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ८३ ॥

एको जघान नरकं सुतरामिहैकमन्यो जघान नरकान्सुतरामनेकान् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः॥ ८४॥

पृ0 २९) एकस्तु याचकबलिं च पुनर्ययाच ह्यन्यो ददाविह परत्र च सौख्यमेव ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ८५ ॥

ग्राहं निहत्य करिराजमरक्षदेको मृत्युं निहत्य मुनिपुत्रमरक्षदन्यः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ८६॥

एकः पपौ स्तनरसं विषतीव्रवेगमन्यः पपौ भुवनभीकरकालकूटम् ॥?
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ८७॥

भक्तेन केनचिदबंधयदब्धिमेको भक्तेन केनचिदपीतयदब्धिमन्यः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ८८ ॥

एकोऽवधीद्रिपुगणं च कृतावतारः शत्रून् जयेति च परः समदादनुज्ञाम् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमायश्रामः ॥ ८९ ॥

एकोऽर्जुनस्य जयदः खलु सूतभावादन्योऽर्जुनस्य जयदोऽभवदस्त्रदानात् ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ९० ॥

पृ0 ३१) एको व्यधात्तृणमिवाद्रिवरं सुमेरुं गोवर्धनाद्रिमितरस्तु करे दधानः ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ९१ ॥

एकं द्विजातिमखिलेषु सुरेषु मध्ये क्षत्रं परं तु परमार्थविदो वदंति ॥
को वानयोरधिक इत्यनुचिंत्य वृद्धाः सत्यं वदंतु तमिमं वयमाश्रयामः ॥ ९२ ॥

अद्वैतमेव भजनीयमतोऽप्रमेयं नित्यं निरंजनमनाकृतिनिर्विकल्पम् ॥
सत्यं परात्परमखंडचिदात्मभावमानंद्यमच्युतमजं तमिहाश्रयामः ॥ ९३॥

पृ0 ३२) श्रीकांतनामविबुधेंद्रतनूभवेन रामेश्वराध्यरसुधामणिना प्रणीतम् ॥
लोके त्विदं हरिहरस्थिततारतम्यं मत्वाधिकं हि शतकं सुधियः पठंतु ॥ ९४ ॥

॥ इति हरिहरतारतम्यं समाप्तम् ॥